# ❖ शोधसारः ❖

ऊनविंशशताब्दी वङ्गभूमेः कृते प्राचीनार्वाचीनयोः सन्धिक्षणरूपेण परिगण्यते । यतः अस्मिन्नेव समये वङ्गभूमौ एका नवीना संस्कृतिरेव प्रारब्धा जाता । सामाजिक-राजनैतिक-पारिवारिकक्षेत्रेषु या नूतना भावना, नूतना गतिरेव सञ्चारिता तस्याः प्रतिफलनमभूत् सर्व्वेषु साहित्येषु ; संस्कृतसाहित्येऽपि नाभूदस्य व्यतिक्रमः। परन्तु ऊनविंशशतकस्य प्रारम्भादेव वैप्लविकं परिवर्तनं नोपलभ्यते संस्कृतसाहित्ये । यतः अष्टादशशतकीया प्राचीनभूता अलंकारशास्त्रसम्मता सनातनी काव्यधारा नितराम् आसीत् प्रवहमाना ऊनविंशविंशशतकेषु । इयं सनातनी काव्यधारा अधुनापि प्रवहमाना दृश्यते ।

अस्याः धारायाः एकः कविरेव हेमचन्द्ररायकविभूषणः। कविरयम् ऊनविंशशतके अन्तिमे भागे अविभक्तवङ्गस्य पावनामण्डले जन्मग्रहणं चकार (१८८२ खृष्टाब्दः) । विंशशताब्द्याः प्रथमार्ध एव हेमचन्द्रप्रणीतानां काव्यकृतीनां समयकालः (१९०४-१९३२ खृष्टाब्दः) । अद्यावधि कवेरस्य नव संख्यकाः काव्यकृतयः सन्ति, यथा – 'परशुरामचरितम्', 'हैहयविजयम्', 'रुक्मिणीहरणम्', 'सुभद्राहरणम्', 'सत्यभामापरिग्रहम्', 'पाण्डवविजयम्', 'दशावतारस्तोत्रम्', 'पतिदानव्रतम्', 'भारतीगीतिः' चेति । तेन प्रणीतानि प्रायः सर्वाण्येव काव्यानि (महाकाव्यानि, खण्डकाव्यानि च) रामायण-महाभारत-पुराणवृत्तान्ताश्रितानि । समसामयिकवृत्तान्तान् अवलम्ब्य तद्रचितं किमपि काव्यम् अद्यावधि न प्राप्यते । मदीये शोधकार्ये हेमचन्द्ररायकविभूषणस्य जीवनचरितस्य यच्चित्रमस्ति तत्र तस्य व्यक्तिगतजीवनं यथा चित्रितमस्ति तथैवास्ति सारस्वतसाधनायाः पूर्णाङ्गं वर्णनम् । हेमचन्द्ररायस्य व्यक्तिगतजीवनविषये अत्यल्पं तथ्यमेव प्राप्यते ; यतः केवलं तस्य वंशपरिचयः, पितुर्नाम, पितृष्वसायाः नाम, कर्मस्थलस्य नाम तथा तस्य कतिपयानामाचार्य्याणां नामानि एव प्राप्यन्ते ; अस्मादधिकं नोपलभ्यते किमपि व्यक्तिगतं तथ्यम् ।

पूर्वोक्तेषु तस्य काव्यकृतिषु कतिपयान् अवलम्ब्य पृथक् पृथग् अध्याये यथाक्रमेण महाकाव्यानां, खण्डकाव्यानाञ्च संक्षिप्तं परन्तु तथ्यनिष्ठं समीक्षणं क्रियते यथामति । अनेन समीक्षणेन काव्येषु वृत्तान्तविन्यासे, रसस्थापने, छन्दोऽलंकारगुणरीतिवृत्तीनां प्रयोगे, चरित्रचित्रणे, श्रव्यकाव्येषु दृश्यकाव्यगतानाम् आलंकारिकनियमानां सुचारुप्रयोगे तथा हृदयाह्लादके अनुवादे कवेरस्य स्वकीयता निपुणता च प्रकाशिता ।

एतद्व्यतीत्य शोधेऽस्मिन् हेमचन्द्ररायस्य रचनासु मङ्गलाचरणाधिक्यम्, पूर्वजानां कविवर्याणां रचनशैल्याः अनुसरणम्, सनातनेन ऐतिह्येन सह आधुनिकतायाः समन्वयो यथा दृश्यते तथैव तस्य रचनशैलीविषये समकालीनानां पण्डितानाम् अभिमतान्यपि उपस्थापितानि सन्तीति । अलमतिविस्तरेण, इति शम् ।

[ **चुम्वकपदानि -** हेमचन्द्ररायकविभूषणः, कविजीवनम्, काव्यकृतयः, समीक्षणम्, समन्वयः। ]